শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥শ্রীমন্নারাযণীযে ষট্ত্রিংশং দশকম্॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীমন্নারাযণীযে ষটিত্রিংশং দশকম্ ॥

## পরশুরামাৱতারৱর্ণনম্

অত্রেঃ পুত্রতযা পুরা ৎৱমনসূযাযাং হি দত্তাভিধো
 জাতঃ শিষ্যনিবন্ধতন্দ্রিতমনাঃ স্বস্থশ্চরন্ কান্তযা।
দৃষ্টো ভক্ততমেন হেহযমহীপালেন তস্মৈ ৱরা -
 নষ্টৈশ্ৱর্যমুখান্ প্রদায দদিথ স্বেনৈৱ চান্তে ৱধম্॥ **36.1** ॥

সত্যং কর্তুমথার্জুনস্য চ ৱরং তচ্ছক্তিমাত্রানতং
 ব্রহ্মদ্বেষি তদাখিলং নৃপকুলং হন্তুং চ ভূমের্ভরম্।
সঞ্জাতো জমদগ্নিতো ভৃগুকুলে ৎৱং রেণুকাযাং হরে
 রামো নাম তদাত্মজেষ্ৱৱরজঃ পিত্রোরধাঃ সম্মদম্॥ **36.2** ॥

লব্ধাম্নাযগণশ্চতুর্দশৱযা গন্ধর্ৱরাজে মনা -
 গাসক্তাং কিল মাতরং প্রতি পিতুঃ ক্রোধাকুলস্যাজ্ঞযা।
তাতাজ্ঞাতিগসোদরৈঃ সমমিমাং ছিৎৱাঽথ শান্তাৎ পিতু -
 স্তেষাং জীৱনযোগমাপিথ ৱরং মাতা চ তেঽদাদ্ৱরান্॥ **36.3** ॥

পিত্রা মাতৃমুদে স্তৱাহৃতৱিযদ্ধেনোর্নিজাদাশ্রমাৎ
 প্রস্থাযাথ ভৃগোর্গিরা হিমগিরাৱারাধ্য গৌরীপতিম্।
লব্ধ্ৱা তৎপরশুং তদুক্তদনুজচ্ছেদী মহাস্ত্রাদিকং
 প্রাপ্তো মিত্রমথাকৃতৱ্রণমুনিং প্রাপ্যাগমঃ স্বাশ্রমম্॥ **36.4** ॥

আখেটোপগতোঽর্জুনঃ সুরগৱীসম্প্রাপ্তসম্পদ্গণৈ -
 স্ত্ৱৎপিত্রা পরিপূজিতঃ পুরগতো দুর্মন্ত্রিৱাচা পুনঃ।

গাং ক্রেতুং সচিৱং ন্যযুঙ্ক্ত কুধিযা তেনাপি রুন্ধন্মুনি -
    প্রাণক্ষেপসরোষগোহতচমূচক্রেণ ৱৎসো হৃতঃ ॥ **36.5** ॥

শুক্রোজ্জীৱিততাতৱাক্যচলিতক্রোধোঽথ সখ্যা সমং
    বিভ্রদ্ধ্যাতমহোদরোপনিহিতং চাপং কুঠারং শরান্।
আরূঢঃ সহৱাহযন্তৃকরথং মাহিষ্মতীমাৱিশন্
    ৱাগ্ভির্ৱৎসমদাশুষি ক্ষিতিপতৌ সম্প্রাস্তুথাস্সঙ্গরম্॥ **36.6** ॥

পুত্রাণামযুতেন সপ্তদশভিশ্চাক্ষৌহিণীভির্মহা -
    সেনানীভিরনেকমিত্রনিৱহৈর্ৱ্যাজৃম্ভিতাযোধনঃ।
সদ্যস্ত্ৱৎককুঠারবাণৱিদলন্নিশ্শেষসৈন্যোৎকরো
    ভীতিপ্রদ্রুতনষ্টশিষ্টতনযস্ত্ৱামাপতদ্ধেহযঃ ॥ **36.7** ॥

লীলাৱারিতনর্মদাজলৱলল্লঙ্কেশগর্ৱাপহ -
    শ্রীমদ্বাহুসহস্রমুক্তবহুশস্ত্রাস্ত্রং নিরুন্ধন্নমুম্।
চক্রে ৎৱয্যথ ৱৈষ্ণৱেঽপি ৱিফলে বুধ্ৱা হরিং ৎৱাং মুদা
    ধ্যাযন্তং ছিতসর্ৱদোষমৱধীঃ সোঽগাৎ পরং তে পদম্॥ **36.8** ॥

ভূযোঽমর্ষিতহেহযাত্মজগণৈস্তাতে হতে রেণুকা -
    মাঘ্নানাং হৃদযং নিরীক্ষ্য বহুশো ঘোরাং প্রতিজ্ঞাং ৱহন্।
ধ্যানানীতরথাযুধস্ত্ৱমকৃথা ৱিপ্রদ্রুহঃ ক্ষত্রিযান্
    দিকচক্রেষু কুঠারযন্ ৱিশিখযন্ নিঃক্ষত্রিযাং মেদিনীম্॥ **36.9** ॥

তাতোজ্জীৱনকৃন্নৃপালককুলং ত্রিস্সপ্তকৃৎৱো জযন্
    সন্তর্প্যাথ সমন্তপঞ্চকমহারক্তহ্রদৌঘে পিতৄন্।
যজ্ঞে ক্ষ্মামপি কাশ্যপাদিষু দিশন্ সাল্ৱেন যুধ্যন্ পুনঃ
    কৃষ্ণোঽমুং নিহনিষ্যতীতি শমিতো যুদ্ধাৎ কুমারৈর্ভৱান্॥ **36.10** ॥

ন্যস্যাস্ত্রাণি মহেন্দ্রভূভৃতি তপস্তন্ৱন্ পুনর্মজ্জিতাং
গোকর্ণাৱধি সাগরেণ ধরণীং দৃষ্টৱার্থিতস্তাপসৈঃ।
ধ্যাতেষ্ৱাসধৃতানলাস্ত্রচকিতং সিন্ধুং স্রুৱক্ষেপণা -
দুৎসার্যোদ্ধৃতকেরলো ভৃগুপতে ৱাতেশ সংরক্ষ মাম্॥ **36.11** ॥

॥ ইতি শ্রীমন্নারাযণীযে ষট্ত্রিংশং দশকং সমাপ্তম্॥